3444. 1. A. अरतिः, C. आनतिः for अरातिः. 3445. 1. BD. संग्रहोक्तं for संग्रहोक्तौ; 2. AB. पौत्रं for पोत्रं; 3. C. तथा for अपि च. 3448. 1. A. प्रकारौ, BD. प्रकारः for प्रघारौ; 2. A. समापवनायः स्वतिक्रमः, B. पवनास्त्वतिक्रमः, C. समौ अवनाकस्तु कान्तिमः for समावत्रनायस्त्वतिक्रमः. 3449. 1. ABCD. °ऽप्यर्थनं for °ऽप्यर्तनं. 3451. 1. A. भ्रेषोऽधःपचने for भ्रेषोऽधःपतने. 3453. 1. B. धूते. for द्यूते; 2. A. दरोररः for दरोदरः; 3. BD. शोणे for शाणे. 3454. 1. After l. 3454. AC. read :–विधाय तक्ष्यते यत्र काष्ठे काष्ठं स उद्घनः । 3457. 1. BD. धूप for यूप; 2. B. मासिका, D. मास्फिका for मालिका.

कालिका मेघसंघाते [1]मधुव्यूहे मधूलिका ।
कुटी गृहे वटी पाशे घटी नाड्यां पुटी पुटे ।
3460 यात्रा प्रवर्तने ध्वान्ते तमिस्रा [1]संस्थितिर्मृतौ ।
स्यात् स्तम्बघ्नः स्तम्बघनः स्तम्बो येन निहन्यते ।
हेलिरालिङ्गनेऽप्यङ्कपालिर्नाली तु मानके ।
परिसर्या परीसार[1] उपेक्षा प्रतिजागरः[2] ।
उपशायविशायौ द्वौ पर्यायौ[1] शयनार्थकौ ।
3465 विस्तारो विग्रहो [1]व्यासः स तु शब्दस्य विस्तरः ।
इज्यायामपि[1] दीक्षा स्यात् प्रतीक्षा [2]प्रतिपालनम् ।
वित्तत्यागे व्ययः स्त्री तु जागर्या जागरा द्वयोः ।
स्यादाश्रय उपघ्नोऽथ डमरो[1] डिम्बविप्लवौ[2] ।
स्यादुत्कारो निकारश्च धान्यस्योत्क्षेपणार्थके ।
3470 विलक्षणं तु शून्यार्थे प्रसूतिः प्रसवः स्रवः[1] ।
ज्यानिर्जीर्णौ क्षये हानिर्जामिस्तु कुलयोषिति ।
तीर्णिस्तु तरणे चूर्णिर्ग्रन्थे चूर्णिः कपर्दके ।

3458. 1. A. मधुव्यो हेमधूलिका, C. मधुव्यूहे मधू° for 3458b. 3460. 1. D. संसृतिः for संस्थितिः. 3463. 1. A. परिसारः प्रेक्षाश्च for परीसार उपेक्षा; 2. B. जागरम् for जागरः. 3464. 1. BCD. पर्याय for पर्यायौ. 3465. 1. A. °ऽप्यासः for व्यासः. 3466. 1. A. om. ll. 3466—3702. and says that these lines are missing in the original (mātṛkā)ms. ("मातृकलो तोंभैयो आकुमोदल् तोंबै अरुपर्यंतं लेदु"); 2. B. परि for प्रति. 3468. C. डमरौ डिम्भ° for डमरो डिम्ब°; 2. B. विप्रवौ for विप्लवौ. 3470. 1. CD. स्नवः for स्रवः.

निष्ठीवस्तु द्वयोर्निष्ठीवननिष्ठेवने तथा[1] ।
निष्ठ्यूतिरथ जीवे स्याज्जीवा संधा प्रतिश्रवे[1] ।
3475 संवाहनं मर्दनं स्यात् खल्या तु खलसंहतिः ।
आपूपिकं शाष्कुलिकमित्याद्यं [1]भूम्न्यचेतसाम् ।
ग्रामता जनता गव्या धूम्या पाश्या सहायता[1] ।
माणव्यं बन्धुता[1] च स्युर्ग्रामादीनां कदम्बके ।
हल्या हलानां ब्राह्मण्यबाडव्ये तु द्विजन्मनाम् ।
3480 पृष्टानां [1]पर्शुकानां च [2]पृष्ठ्यं पार्श्वं कदम्बके ।
मानुष्यकं मनुष्याणां खलानां खलिनीति च ।
क्रमात् साहस्रकारीषवार्मणाथर्वणानि तु ।
सहस्राणां करीषाणां स्युर्वर्माथर्वणां गणे ।
स्फुरणे स्यात् स्फुरस्फारौ द्वयोः पारिः[1] सृणेर्गुणे ।

इति ❀ वत्सकुलवामनभट्टबाणविरचिते शब्दरत्नाकरे
संकीर्णाध्यायश्चतुर्विंशः ॥

3473. 1. C. समे for तथा. 3474. 1. C. प्रतिश्रये for प्रतिश्रवे. 3476. 1. C. भूम्नि for भूम्न्य°. 3477. 1. D. सहायिता for सहायता. 3478. 1. C. बन्धुतायाः for बन्धुता च. 3480. 1. C. पार्श्वकानां for पर्शुकानां; 2. B. पार्श्व्यं पृष्ठ्यं, C. पृष्ठ्यं पार्श्व्यं D. पार्श्वं पृष्ठ्यं for पृष्ठ्यं पार्श्वं. 3484. 1. B. पारिस्पृणी, CD. परिसृणिः for पारिः सृणेः. ❀ BCD. om. वत्सकुलवामनभट्टबाणविरचिते.

२५

उक्तशेषाध्यायः

3485 पूर्वाध्यायेषु यः शेषोऽभिहितेषु स उच्यते ।
अन्येषु [1]नामशास्त्रेषु प्रयोगानुपलभ्य हि ।
विश्वात्मा प्राणदः शंभुर्द्रुहिणश्च सनातनः ।
मुञ्जकेशो मुररिपुः [1]पुराणपुरुषोऽजितः[2] ।
अग्निदः पूर्वगीर्वेदः स्यादकृत्रिमगीरपि ।
3490 शक्तिः श्रीः शूर्पकारातिरिक्षुधन्वा च [1]हृच्छयः ।
जलंधररिपुर्देवो [1]डिण्डीशः [2]पांसुचन्दनः ।
खट्वाङ्गी पश्यदलिकः [1]पाण्डुराङ्गो भगाक्षिहृत् ।
चण्डमुण्डा[1] तु चामुण्डा कर्णमोटी कपालिनी[2] ।
चर्चिका [1]चर्ममुण्डाथ वाराही [2]पञ्चमी समे ।
3495 विनायकस्तु बुद्धः स्यादृषिहंस[1]स्त्रिकालदृक्
गौरेयो बर्हवासाः[1] स्यान्मघवा[2]नहिशासनः ।

3486. 1. C. वेद for नाम. 3488. 1. B. C. पुराणः for पुराण°; 2. C. °ऽच्युतः for °ऽजितः. 3490. 1. C. हृच्छ्रयः for हृच्छयः. 3491. 1. C. भिण्डीशः for डिण्डीशः; 2. B. पाण्डुनन्दनः D. पाण्डुचन्दनः for पांसुचन्दनः. 3492. 1. C. पाण्डरा° for पाण्डुरा°. 3493. 1. B. चण्डमुण्डी for चण्डमुण्डा; 2. B. °मोटी तु पालिनी for °मोटी कपालिनी. 3494. 1. B. चण्डमुण्डा for चर्ममुण्डा; 2. B. पञ्चमे for पञ्चमी. 3495. 1. C. ऋषिस्त्वङ्ग°, BD. °ऋषिः सिंहः for ऋषिर्हंसः. 3496. 1. B. °बाहः, D. वाहः for वासाः; 2. C. मघवा महि for मघवानहि°.

भूरिश्रवाश्चित्ररथो [1]वृषणाश्वस्तदर्वति ।
सूर्यभ्राता सुरगजो व्याधामः शतधारकम् ।
बहुलोऽग्निर्वसुर्ज्योतिर्जठराग्निस्तु हृच्छयः ।
झलका[1] तु महाज्वाला समुद्राग्निरबिन्धनः ।
धर्मः[1] प्रजान्तको दण्डी जीवितेशो महाभिषक् ।
नरकाः शल्मली पूतिर्मृत्तिकः संप्रतापनः ।
असिपत्रवनाद्याश्च नरकाः प्रायशो नरि ।
रक्तग्राहा निशिचरा [1]विधुराः कीकसात्मजाः
प्रत्यगाशापतिस्त्वम्बुकान्तारो जलदैवतम् ।
न[1]भःप्रवहणो वायुर्नभोजन्मा महाबलः ।
झञ्झावातः सवृष्टिः स्याद्यौतिकः स्वेदचूषकः[1] ।
सितोदरो [1]रत्नहस्तो धनी कैलासनायकः ।
अव्यये तु द्यु नक्षत्रपथः सुरपथश्च सः ।
दिनप्रणीर्दृगध्यक्षो[1] हरिच्छन्दस्तुरंगमः ।
क्षपाकरः सुधासूतिर्निशाकेतुः पुनर्भुवा ।
समुद्रनवनीतं च भौमे प्रव्यालकर्षकौ ।
दीदिविर्देवमन्त्री स्यात्तिर्यग्गामी तु भार्गवः ।
शनिः स्थिरगतिः कोणो मार्ताण्डयुगवर्तकः ।

3497. 1. C. वृषणासस्तद° BD. वृषणश्वतद° for वृषणाश्वस्तद°. 3500. 1. B. झालाका, A. झलक्का, D. जलका for झलका. 3501. C. यमः for धर्मः. 3504. 1 BD. विसुराः for विधुराः. 3506. 1. BD. नभाः for नभः. 3507. 1. BD. यूषकः for चूषकः. 3508 1. BD. रक्त for रत्न. 3510. 1. B. मृगाध्यक्षः for दृगध्यक्षः.

3515 राहुस्तु ग्रहकल्लोलः केतवः शिखिनः समाः ।
समे नक्षत्रधिष्ण्ये द्वे दाक्षायण्योऽश्विनीमुखाः ।
जाया त्वसिक्नी दक्षस्य दाक्षायण्योऽस्य कन्यकाः ।
कृष्णद्वैपायनः कृष्णो व्यासः सत्यवतीसुतः ।
स्याद् बादरायणिः पाराशर्योऽस्य तनयः शुकः ।
3520 वातापिदमनोऽगस्त्यो ध्रुव उत्तानपादजः ।
कण्वकौण्डिन्यशाण्डिल्यमौद्गल्यात्रेयभार्गवाः ।
काश्यपाङ्गिरसौर्वाजगार्ग्यहारीतगौतमाः ।
वासिष्ठ[1]शाठमर्षणवाधूलागस्त्यदैवलाः[2] ।
कौत्सार्ष्टिषेणवात्सारवैश्वामित्राघमर्षणाः ।
3525 अमी तु कण्वमुख्यानां गोत्रापत्यार्थवाचिनः ।
दिवोदासः[1]परुच्छेपी नोधा मेधाति[2]थीश्वरौ ।
सत्यश्रवाः सप्तवध्रिः[1]प्रियमेधः[2]प्रतर्दनः[3] ।
श्येनो मेध्यातिथिः शंयुः[1]प्रगाथः शकटायनः ।
ब्रह्मातिथिर्वीतहव्य[1] [ऋष्यशृङ्गो] वृषाकपिः ।
3530 न[1]भःप्रभेदनो[2]बभ्रुर्मूर्धन्वान् कवषः प्रथः[3] ।
देवा[1]तिथिर्हरिमन्तस्त्रसदस्युः शिरिम्बिठः ।

3523. 1. CD. शठ for शाठ; 2. C. दैवपाः for दैवलाः 3526. 1. B. परि for परु; BD. °तिथिश्च तौ for °तिथीश्वरौ. 3527 1. B. इत्यादावृग्वेदगणयः, D. इत्याद्यृग्वेदगर्षयः for 3527b. 2. C. प्रमर्दनः for प्रतर्दनः; 3. BD. delete ll. 3528–3552; 3528 1. C. प्रगायः for प्रगाथः. 3529. 1. C. विष्टिहव्यः ऋषिषेणः for वीतहव्य ऋष्यशृङ्गः. 3530. 1. C. नागः for नभः; 2. C. बभ्रो for बभ्रुः; 3. C. पथिः for प्रथः. 3531. 1. C. दोपाति हरिति for 3531a.

घुताननाभनेदिष्ठौ रक्षोहा यक्ष्मनाशनः ।
हिरण्यगर्भो वत्स[1]प्रिरूर्ध्वसद्मा बृहन्मतिः ।
ऊर्ध्वग्रावा[1] हविर्धानः सप्तिरूर्ध्वन[ा]भाः कृतः ।
3535 द्यु[1]म्नीको व्याघ्रपाद् द्रोणस्त[2]पुर्मूर्धा करि[3]क्रतः ।
उरुचक्रिः कुरुसुतिर्विप्रजूतिरिरिम्बिठिः[1] ।
वरतन्तुर्विप्रबन्धु[1]र्ध्रुवः कुल्मलबर्हिषः ।
जरत्कर्णो [जा]मदग्निः[1] प्रस्कण्वः[2] पावको[3] भृगुः ।
विश्वावसुः सत्यधृतिः शैरीषिस्त्रिशिरा[1] उलः ।
3540 ऋषभः सौ[भ]रिर्विश्वमना- - -आर्थव[णः]- - -[1]।
- - -[अभि]तपा यज्ञो वातजूतिः सदापृणः[1] ।
नारायणः [शि]खण्डिन्यौ पूरुः कुत्सो बृहद्दि[वः][1] ।
दृ[1]व्हच्युतोऽध्रीगुर्विष्णुरग्नियूप[2] उरुक्षयः ।
सिन्धुक्षिदनिलो वि[भ्राट्] कृष्णो बिन्दुरनानतः ।
3545 अमहीयुर्दीर्घतमा [1]मारीचांहोमुचौ लुशः ।

3533. 1. C. वत्सप्रीरुद्धसत्मा for वत्सप्रिरूर्ध्वसद्मा. 3534 1. C. ऊर्ध्वग्राह्रो for ऊर्ध्वग्रावा. 3535 1. C. द्युमनी for द्युम्नीकः; 2. C. त्रपुमूर्धा for तपुर्मूर्धा; 3. C. करीकृतः for करिक्रतः. 3536. 1. C. विप्रसूतिरिरिम्मदः for 3536b. 3537. 1 C. विप्रतन्तुः for विप्रबन्धुः. 3538 1. C. जाग्रत्कर्ण···मरग्निः for 3538a; 2. C. प्रस्कन्नः for प्रस्कण्वः; 3. C प्रवतः for पावकः 3539 1. C. त्रिशिखा उखः for त्रिशिरा उलः. 3540. 1. C. ऋभसौरिविश्वमना···अथर्वा···for l. 3540. 3541. 1. C. सत्यजूर्तिः सदाव्रणः for 3541b. 3542. C. नारायणः खण्डको···पुरुकुत्सो·· बृहद्दि···। for l. 3542. 3543. 1. C. दृढ for दृव्ह; 2. C. अग्निरूपः for अग्नियूपः. 3545. 1. C. मरीकांहोमुचालुशः for 3545b.

मन्युदेवापिकर्णश्रुद्वरुणा मथितः सुदाः[1] ।
कक्षीवन्मुष्क[1]व[चक्षु]र्विश्वकर्मदुवस्यवः ।
सोमाहुतिश्चित्रमहा वसुकृद्वरुणो द्वितः[1] ।
वव्रि[र्वसु]श्रुतो मित्रो विश्वसामा सुतंभरः ।
माध्यंदिनिः सारि[1]सृक्को विश्वको विश्वचर्षणिः ।
विवस्वान् सप्तगुः केतुः [1]गोषूक्तयज्ञावुपस्तुतः ।
अर्चनाना [1]पूतदक्ष एकद्यूश्च महर्षयः ।
सत्त्वं राजस्तमोऽस्पृष्टं मनः [1]करणमिन्द्रियम् ।
ज्ञाने तु वित्तिः संवित्तिः प्रतिभा ज्ञानगौरवम् ।
शिल्पज्ञाने तु विज्ञानं चित्ताभोगो मनस्क्रिया ।
मिथ्यादृष्टिस्तु[1] नास्तिक्यं विवेकः पृथगात्मता ।
स्यात् पृथग्दृष्टिरध्यात्मज्ञानं ध्यानं तु चिन्तनम्[1] ।
क्लेशो[1]ऽविद्यास्मितादिः स्याद्विपाको भवितव्यता ।
प्रत्यापत्तिः पुनः प्राप्तिर्ज्ञात्वारम्भ उपक्रमः ।
वडबास्यं[1] तु पातालं सरन्ध्रे सुषिरं त्रिषु ।

3546. C. मन्युदेवाविकर्णश्रूदिरूणामधिसुस्तुवः for l. 3546. 3547. C. कक्षीवान्मुञ्जवत्…विश्वकर्मदुवस्यचः for l. 3547. 3548. C. द्विजः for द्वितः. 3550. 1. C. सारसृत्वो विश्वहा for सारिसृक्को विश्वकः. 3551. 1. C गौष्कर्तागौ for गोषूक्तयज्ञौ. 3552. 1. C. पूतदक्षि (क्षी) एकद्यूमहर्षयः for पूतदक्ष एकद्यूश्च महर्षयः l. 3553. 1. C. कारणम् for करणम्. 3556. 1. C. °दृष्टिर्नास्तिकता for °दृष्टिस्तु नास्तिक्यं. 3557. 1. B. om l. 3557. 3558. 1. C. केशोऽविद्यसितादि स्यात् for 3558a. 3560. 1. BD. वद्धबास्यं for वडबास्यं.

तमिस्रे तु तमिस्रा स्त्री नागी[1] तु स्थूलपन्नगी[2] ।
दर्वी[1] फणं गरः क्ष्वेलः स्यात्तु काकोदरोरगी[2] ।
काकोदरी भुजङ्गी च व्याली विषधरापि च ।
कथाप्रसङ्गस्तु विषवैद्ये स्यात्तन्त्रमौषधम् ।
3565 नदराजः सिन्धुराजो यादोनाथ इरा जलम् ।
विषं च कर्बूः कुल्यायां जलशूकस्तु शैवलम् ।
समुद्रकूले मर्यादा स्यात् प्लवे [1]तल्पमद्य(द्व?)योः ।
सारणस्त्वल्पकुल्यायां जलयादो जलद्विपः ।
कुम्भिनी रत्नगर्भाब्धिनेमिरम्बुधिमेखला ।
3570 कृष्णमृत्कृष्णभूमः[1] स्यात् [2]पाण्डुभूमस्तु पाण्डुमृत् ।
रोदस्तु रोदसी गङ्गा[1] रुमा विश्वं जगत्समे
द्रोणिस्तु शिलयोः[1] संधी रोहणो रत्नभूधरः ।
दन्तकास्तु बहिस्तिर्यक्पाषाणाः पतिता गिरेः ।
बोधिद्रुमे तु श्रीवृक्षः पलाशः[1] स्यात्त्रिपर्णकः ।
3575 समानौ बिल्वमङ्गल्यौ मातुलुङ्गे तु लुङ्गकः ।
देविकायां महाशुक्ला दूष्याङ्गी[1] मधुकुक्कुटी ।

3561. 1. B. नाशी for नागी; 2. BD. पन्नगः for पन्नगी. 3562. 1. C. दर्विः for दर्वीः; 2. BD. °दरी गरी for दरोरगीः 3567. 1. C. तल्पमभ्ययोः for तल्पमद्वयोः. 3570. 1. C. कृष्णभूमिः for कृष्णभूमः; 2. C. पाण्डुभूमिः fo पाण्डुभूमः. 3571. 1. C. कुञ्जा for गङ्गा. 3572. C. शिवयोः for शिलयोः. 3574. C. पालाशः for पलाशः. 3576. 1. C. पुष्याङ्गी for दूष्याङ्गी.

नारङ्गे[1] तु[2] त्वङ्ग(क्‍सु?)गन्ध एलकं[3] च वराम्लकः[4] ।
रोहितो रोहिषो रोही रक्तो रोहितकोऽपि च ।
बाणोऽर्जुने[1] [2]प्रियाले तु प्रियकश्च[3] मधुस्रवः ।
3580 मदने [1]वामनेक्ष्वाकुविषपुष्प[2]फणीरसाः ।
कण्टकी गरलः[1] प्लक्षे कपिला गिरिलक्षणा ।
गुग्गुलुः कालनिर्यासो देवधूपो महेश्वरः ।
श्रीमान् स्निग्धः सर्वसहः [1]श्लेषी कामो हरप्रियः ।
जटायुरथ[1] भावज्ञा बला[2] वृन्ताथ भूर्जके ।
3585 चर्मी[1] च भूर्जपत्रश्च[2] धूर्तो मदनदुर्द्धुरौ[3] ।
पुलकप्रावृषेण्यौ तु कदम्बः प्रियकश्च सः ।
पूगावली[1] तु कुहली[2] बदरी तु तिरीटिका[3] ।
करमर्दो वशश्चोलः कृष्णपाकफलैः पदैः ।
व्यस्तैः समस्तैर्धूमैश्च पुंसि पञ्चदशाभिधाः ।
3590 हरणः[1] शीतलः कान्तः कमनीयश्च चम्पके ।

3577. B. सारङ्गे, C.--रङ्गः for नारङ्गे; 2. C. स्यात् क्रतुत्वङ्ग for तु त्वङ्गगन्धः; 3. C. लवङ्गश्च for एलकं च; 4. C. वरालकः for वराम्लकः. 3579. 1. BD. °ऽर्जने for ऽर्जुने; 2. C. प्रियालो वै तुङ्गद्रुश्च for प्रियाले तु प्रियकश्च; 3. BD. प्रियकं च for प्रियकश्च. 3580. 1. C. चमठ—कु for वामनेक्ष्वाकु; 2. BD. पुच्छ for पुष्प. 3581. 1. B. गरले for गरलः. 3583. 1. B. श्लेषिका मोहनप्रियः, C. ज्येषिका मोहनप्रियः for 3583b. 3584. 1. C. जटायुधा च for जटायुरथ; 2. BD. जला वृन्ता च for बला वृन्ताथ. 3585. 1. B. वर्म, D. वमु for चर्मी; 2. B. पत्रं च for पत्रश्च; 3. D. दुर्द्धरौ for दुर्द्धुरौ. 3587. 1. CD. पूगपाली for पूगावली; 2. C. कुलली for कुहली; 3. D. कृतिरीटिका for तु तिरीटिका. 3590. 1. C. भरणः D. करणः for हरणः.

चण्डालस्तु[1] कुबेगाची कृष्णवृन्ता फलेरुहा ।
स्याच्छाल्मली तूलफला शबरी [1]श्लक्ष्णपत्रिका ।
कार्पासस्तु पिचव्यः[1] स्याद् भारद्वाजस्तु कुष्ठनुत्[2] ।
भार्ग्यं विषघ्नी कुष्ठाख्या पद्मा च ब्रह्मदण्डिका ।
दण्डोत्पले सहा देवा तलप्रोटे[1] प्रमेहनुत् ।
मुण्ड्यां तु मुण्डिता मुण्डा श्रमणिः श्रमणी बुधा ।
अस्थिमांसोऽस्थिसंघातोऽप्यस्थिसंनहनोऽपि सः ।
सुदर्शनायां चक्राङ्गी [1]दध्याली [2]वृषपर्ण्यपि ।
कलम्ब्यां शतपर्वा स्यात् कलम्बूर्वायसी वसा ।
निद्रालुस्तु शिवः शान्तः स्वस्तिकस्तु निषण्णकः ।
अगस्त्यः[1] [2]शुकनासोऽथ महेन्द्री तु [3]बृहत्फला ।
सुगन्ध्यल्पफला मोचा साष्ठी[1] काष्ठी[2] कदल्यपि ।
आमलक्यां षडस्रा[1] स्याच्छुक्लपुष्पा[2] हरीतकी ।
मुद्गरो मदयन्ती[1] च गवाची मुक्तबन्धना ।
मल्लिकायां [1]वरारोहा गोधामल्ल्यां तु सेवनी ।

3591. B चाण्डावस्तु for चण्डालस्तु. 3592. 1. C. शुक्ल for श्लक्ष्ण. 3593. 1. C. पिचस्य: for पिचव्य:; 2. BD. कुण्ठनुत् for कुष्ठनुत्. 3595. 1. BD. तलपोटे for तलप्रोटे. 3598. 1. C. दध्यौली for दध्याली; 2. BD. वृक्ष for वृष. 3601. 1. B. om. 1. 3601; 2. C. चक्र for शुक; 3. C महत् for बृहत्. 3602. 1. B साष्ठीं for साष्ठी; 2. B. कार्षी, D. काषी, C. काली for काष्ठी. 3603. 1. C. षडर्का for षडस्रा; 2. BD. सृष्टा for पुष्पा. 3604. 1. BD. दमयन्ती for मदयन्ती. 3605. 1. C. वचोहोऽथ गोधामल्यं for वरारोहा गोधामल्ल्यां.

शिवमल्ली काकनासा बकपुष्पः[1] शिवप्रियः[2] ।
वसुहट्टोऽथ तगरो[1] नन्द्यावर्तो नभोङ्गणः[2] ।
श्वापदा हिंस्रपशवः सिंहः पारीन्द्र इत्यपि ।
व्याघ्रो[1] वरोत्कटस्तुल्यौ वराहस्तु बहुव्रजः ।
3610 वृकधूर्तस्तु भल्लूको भल्लाटो दीर्घरोमकः ।
अथ खड्गी गणोत्साहो महिषस्तु रजस्वलः ।
हेरम्बः कृष्णशृङ्गश्च मृगस्तु वलनो लिगुः ।
वारणः पेचकी[1] कुम्भी मदवाही महामृगः ।
भद्रा[1] मन्दा मृगाश्चेति त्रिविधा गजजातयः ।
3615 अर्वती च प्रसूस्तुल्ये रक्तदृष्टिस्तु कोकिलः ।
कालज्ञः कृकवाकुः स्याच्चिरजीवी तु वायसः ।
निशाटनी[1] मातृवाहा[2] मुखविष्ठाजिनच्छदा ।
शारिकायां तु गौराङ्गी शलभी कलहाकुला ।
विनीताङ्गो[1] दीर्घगलः[2] प्रचलाकी तु चन्द्रकी[3] ।
3620 कपिञ्जलो वञ्जुलः स्यात् पिङ्गला ऋषिरित्यपि ।

3606. 1. BD. पुष्पा for पुष्पः; 2. BD. प्रिया for प्रियः. 3607. 1. BD. तरगः for तगरः; 2. C. नभोगणः for नभोङ्गणः. 3609. 1. B. व्याघ्रोत्परोत्कटः for व्याघ्रो वरोत्कटः. 3613. 1. B. पेचनः, D. पेचकः for पेचकी. 3614. 1. BC. भद्रमन्दा for भद्रा मन्दा. 3617. 1. C. निशाटिनी for निशाटनी; 2. D. मातृवाहः for मातृवाहा. 3619. 1. BC. नवीताङ्गः, D. निवीताङ्गः for विनीताङ्गः; 2. C. दीर्घदलः for दीर्घगलः; 3. BD. चन्द्रिका for चन्द्रकी.

स्यात् साकेतमयोध्यायां काशी वाराणसी समे ।
स्याद् द्वारका द्वारवती [1]कान्यकुब्जं महोदयः[2] ।
महोदयं [1]कन्यकुब्जं माहिष्मत्यां वृकस्थली ।
देवकोटिः कोटिवर्षं काकन्दी[1] वारणावतम् ।
3625 अवन्ती[1] स्यात्तक्षशिला स्यात्तु केशं[2] कुशस्थलम् ।
स्थानीयं तु महाग्रामे[1] ग्रामार्धे[2] खेटमस्त्रियाम् ।
ब्रह्मस्थली[1] वास्तुमध्यं [2]संदंशो वास्तुकोणभूः ।
प्रान्तरं[1] ग्रामयोर्मध्यं ग्रामसीमोपशल्यकम् ।
घण्टापथः संसरणं समे वयुनवर्त्मनी ।
3630 उपरथ्या दर्शनी स्याद् घण्टामार्गे तु निष्करः ।
समानौ दुर्गकोटौ द्वाविन्द्रकोशे[1] मतङ्गकः ।
मालिका स्त्री वेश्मभेदे निर्यूहे मत्तवारणम्[1] ।
वीणा घोषवती सा तु गणेशस्य प्रभावती ।
विश्ववसोस्तु[1] बृहती तुम्बुरोस्तु कलावती ।
3635 महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी ।
स्युर्नाटकं प्रकरणं भाणः प्रहसनं डिमः ।
व्यायोगः समवाकारौ वीथ्यङ्केहामृगा इति ।

3622. 1. BD. कन्या for कान्य; 2. C. महोदयं for महोदयः. 3623. 1. BD. कान्य for कन्य. 3624. 1. C. काकदा for काकन्दी. 3625. 1. B. अवन्तिः for अवन्ती; 2. BD. कोशं for केशं. 3626. 1. BD. ग्रामः for ग्रामे; 2. B. ग्रामार्भे, D. ग्रामास्ते for ग्रामार्धे. 3627. 1. C. बृहत्स्थली for ब्रह्मस्थली; 2. BD. संदेशः for संदंशः. 3623. 1. C. प्रापेयं for प्रान्तरं. 2. BC. मध्ये for मध्यं. 3631. 1. BD. कोशः for कोशे.

रूपकाणि दशैतानि वंशो[1] वंश्यथ[2] खुङ्कणी ।
किंनरी काण्डवीणा च कुत्रीणा सारिका च सा ।
3640 चण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ।
भारती सात्त्वती चैव कैशिक्यारभटीत्यमूः[1] ।
चतस्रो वृत्तयो[1] नान्दीकरा[2] नान्द्याश्च पाठकाः ।
रसवागङ्गभावाद्यैः शास्त्रोक्तैः रूपकाश्रयम्[1] ।
नृत्तमाभ्यन्तरं नाम कालिका[1] तु विवर्णिका[2] ।
3645 रोमाञ्च उल्लूकसनं[1] वीक्षणं तु निभालनम् ।
स्याद्दृष्टिरसौम्येऽक्ष्णि पार्श्वेक्षा तु प्रलोकितम् ।
उल्लोकनं[1] तूपरिष्टात् पृष्ठतस्त्ववलोकनम् ।
उन्मीलनं स्यादुन्मेषो निमेषस्तु निमीलनम् ।
भ्रूकुटिर्भ्रुकुटिः[1] सारी रेचितं[2] त्वल्प(त्वेक?)या भ्रुवा ।
3650 निकुञ्चितशिरोग्रीवमट्टहासो महाहसः ।
सोत्प्रास[1]माच्छुरितकं प्रलयोऽस्पन्दनस्थितिः ।
जज्ञभा[1] मुखभेदे स्यात् तालिका[2] तु वितालिका ।

3638. 1. C. वंश्यः for वंशः; 2. BD. वंशी तु for वंश्यथ. 3641. 1. B. ह्यमूः for °त्यमूः. 3642. 1. BD. रीतयः for वृत्तयः; 2. C. नान्दीकाराः for नान्दीकराः. 3643. 1. C. रूपकं श्रियः, D. रूपकात्रयम् for रूपकाश्रयम्. 3644. 1. C. मालिका for कालिका; 2. D. चिकण्ठिका for विवर्णिका. 3645. 1. C. उन्मूकसरं for उल्लूकसनं. 3647. 1. A. उल्लूकनं for उल्लोकनं. 3649. 1. B. भ्रुकुटिर्भ्रूकुटिः सारिः for 3649a; 2. C. रोचित्तं for रेचितं. 3651. 1. C. सोत्प्राशम् for सोत्प्रासम्. 3652. 1. C. — जृम्भा for जज्ञभा; 2. BD. कालिका for तालिका.

ज[1]याद्ज्ञमुभे[2] स्यातामव्यये मोहनं रतम् ।
विवाहो नन्दनो[1] वप्ता पतिः स्त्री संततिः सुतः ।
3655 कटीरः[1] कटिरारोहः[2] [3]श्रोणिरासा[4] तु सीवनी[5] ।
वक्षोरुहावुरसिजौ भगस्मरगृहे समे ।
समौ करङ्ककङ्कालौ पृष्ठग्रन्थौ गडुः पुमान् ।
ध्वजे नालं च मेढ्रं[1] स्यात् [2]कुरलाश्चूर्णकुन्तलाः ।
पर्यस्तिका[1] तु पर्यङ्के [2]तस्मिन्नेवावसक्थिका ।
3660 गौणिका[1] स्यात् पुटकुटी[2] तस्यां गुणालयिन्यपि[3]
स्याद्वेत्रासनमासन्दी[1] गृहस्थो गृहमेधिनि ।
मारिः स्त्री मारको रोगः[1] केशघ्नस्त्व[2]न्द्रलुप्तकः ।
मीमांसको जैमिनेयो वेदान्ती ब्रह्मवादिनि ।
वैशेषिकः स्यादौलूक्यः सौगतः शून्यवादिनि ।
3665 नैयायिकस्त्वाक्षपादो बार्हस्पत्यस्तु नास्तिकः ।
पारिषद्याः पार्षदाः स्युः सभ्या [1]याज्ञात्ववायसी[2] ।

3653. 1. C. जायायां दमितं यः स्यात् for 3653a; 2. B. उद् (त?) for उभे. 3654. 1. C रन्दरः for नन्दनः. 3655. 1. C. कटिरः for कटीरः; 2. C. °रारोहौ for °रारोहः; 3. CD. श्रोणी for श्रोणि; 4. C. नासा for रासा; 5. BD. पीवनी for सीवनी. 3658. 1. BD. मेढ्रः for मेढ्रं; 2. BD. कुरणाः for कुरलाः. 3659. 1. BD. पर्याप्तिका for पर्यस्तिका; 2. B. तस्मिन्नेवाववर्त्तिका; C. तस्मिन्नेवास— D. तस्मिन्नेवावथिका for 3659b. 3660. 1. BD. गोणिका for गौणिका; BD. कटी for कुटी; 3. BD. तस्याङ्गुलिलयिन्यपि for 3660b. 3661. 1. B. आसन्द्री for आसन्दी. 3662. 1. BD. रोहः for रोगः; 2. B. केशवः for केशघ्नः. 3666. 1. C. परीषवः पारिषद्यः सभ्यायां ज्ञात्ववायसी for 3666; 2. B. यज्ञो for याज्ञा.

स्यात् पारिरक्षिको[1] भिक्षुरभ्युत्थानं तु गौरवम् ।
पञ्चार्थिकः[1] पाशुपतो वैष्णवः पाञ्चरात्रिकः ।
कौलस्त्वान्वयिको[1] योगी कापालिकमहाव्रतौ ।
3670 सत्यव्रतो हरिश्चन्द्रः ककुत्स्थस्तु[1] पुरंजयः ।
अर्जुनः कार्तवीर्यः[1] स्यात् पृथुर्वैन्य उभौ समौ ।
निषधस्तु नलोऽथ स्याज्जनको मिथिलाधिपः ।
हनूमानाञ्जनेयश्च हनुमान्मारुतात्मजः ।
सुग्रीवः कपिराट् तुल्यौ द्वौ जटायु[1]जटायुषौ ।
3675 अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः ।
गुणो वायुसुतो भीमो भीमसीनो वृकोदरः ।
अर्जुनः फल्गुनो जिष्णुः सव्यसाची धनंजयः ।
कृष्णः किरीटी बीभत्सुः कर्णशत्रुः कपिध्वजः ।
गाण्डीवी विजयः श्वेतवाहो मध्यमपाण्डवः ।
3680 पाञ्चाली द्रौपदी कृष्णा याज्ञसेनी च पार्षती ।
सौवस्तिकः पुरोधाः स्याद्गणकादेशकौ[1] समौ ।
कौशलिकं[1] प्राभृतकं संघर्षः स्पर्धया समः ।
अपर्यालोचितारम्भे[1] रभसो रभसाव्ययम् ।

3667. I. C. पारिरक्षकः for पारिरक्षिकः. 3668. I. BD. पाञ्चालिकः for पञ्चार्थिकः. 3669. I. C. कालस्त्वान्वधिकः for कौलस्त्वान्वयिकः. 3670. I. BD. काकुत्स्थस्तु for ककुत्स्थस्तु. 3671. I. D. कार्तवीर्यश्च for कार्तवीर्यः स्यात्. 3674. I C. जटायुश्च जटायुषः for 3674b. 3681. I. C. गणिकादेशिकौ for गणकादेशकौ. 3682. I. B कौशलीकः for कौशलिकं. 3683. I. BD. °रम्भैः for °रम्भे.

उत्कोचः पुंसि लम्बा[1] स्त्री सेनार्थे दण्ड इत्ययम् ।
3685 वृद्ध्याजीवो[1] द्वैगुणिको भक्तं कूरमिमे समे ।
शमिताम्लकदुग्धार्द्रा पक्वा[1] खण्डे [2]घृतोत्तरे ।
संधापोतं[1] युता चूर्णैः खण्डैलामरिचार्द्रकैः[2] ।
क्षीराढ्यः[1] शमितापिण्डो [2]घृतपूरो घृतश्रुतः ।
फेनकः शमिता[1] शुक्ला घृतपक्वा[2] सशर्करा ।
3690 स्त्रियां तु शष्कुली पिष्टगुडतैलतिलैः[1] कृता ।
सतीनकस्तु सातीनः समावुद्दालकोद्रवौ ।
समौ तु [1]वल्लनिष्पावौ राजिका राजसर्षपः ।
व्यञ्जनं[1] शृङ्गिबेरेण संस्कृतं शार्ङ्गिबेरकम् ।
दाधिकं संस्कृतं दध्ना सार्पिषं[1] सार्पिषा तु यत् ।
3695 भू[1]मिर्भूकटकं[2] भृष्टं[2] भटित्रं चादिमं[3] स्त्रियाम् ।
लावणौदकिकं तत् स्यात् पक्वं यल्लवणोदकैः ।

3684. 1. BD. लाम्बा for लम्बा. 3685. 1. B. वृत्त्याजीवः, C. वुद्ध्याजीवः for वृद्ध्याजीवः. 3686. 1. C. कक्वा for पक्वा; 2. BD. कृतो° for घृतो°. 3687. 1. BD. संयायोऽयं for संधापोतं; 2. BD. मरिचावृकैः (तैः?) for मरिचार्द्रकैः 3688. 1. BD. क्षीराम्येश्शमिता for क्षीराढ्यः शमिता; 2. BD. घृतपूरे for घृतपूरः. 3689. 1. BD. शमितः for शमिता; 2. BD. पक्वाल्पशर्करा for पक्वा सशर्करा. 3690. 1. C. घृतैः for तिलैः. 3692. C. चय D. पल्ल for वल्ल. 3693. 1. C. व्यजनं for व्यञ्जनं. 3694. 1. D. सार्पिष्कं for सार्पिषं. 3695. 1. B. भूमिभूकटकं, D. भूमिभूकुटकं for भूमिर्भूकटकं; 2. C. भ्रष्टं for भृष्टं; 3. D. चादिम for चादिमं.

सुरुङ्गा[1] स्त्री पुमान् संधिर्व्यलीकं वञ्चनं समे ।
अथ क्लीबे घटीयन्त्रं पादावर्तो[1]ऽनुघट्टकः ।
जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु ।
3700 पादुकायां तु पादूः स्त्री गल्लकः[1] पानभाजनम् ।
संमुखीनस्त्वभिमुखः सुमुखस्तु प्रगल्भवाक् ।
कृतकृत्यः कृतार्थः स्यात् समौ न्यक्षनिकृष्टकौ ।
असम्मतः प्रणाय्यः स्याद्यस्तु स्वस्थानमास्थितः ।
परान्[1] द्वेष्टि स गोष्ठश्व ईर्ष्यालुकुहनौ समौ ।
3705 तीक्ष्णोपायेन योऽन्विच्छेत् स्यादायःशूलिकश्च सः ।
उल्बणस्तूद्धतस्तु[1]ल्यावात्मवद्वशिनौ समौ ।
वल्गुर्हारी मनोहारी [1]परिविष्टं तु वेष्टितम् ।
बलाद्गृहीतमा[1]च्छिन्नं समे बहलपीवरे ।
[1]प्रेङ्खितं स्याद्विलुलितं शालिश्रेष्ठा[2]वुभौ समौ ।
3710 परभागो गुणोत्कर्षे संदर्भो रचना न ना ।
प्रणिपातः प्रणामः स्याद्दाक्षिण्यमनुकूलता ।
कक्ष्या तुलायां कौसीद्यमालस्यं चयनं चयः ।

3697. 1. BD. सुरुहा for सुरुङ्गा. 3698. 1. C. °वर्तोरु° for °वर्तोऽनु°. 3700. 1. B. पल्वकं, C. गल्लकं for गल्लकः. 3704. 1. BD प्रजां for परान्. 3705. 1. BD. स तु स्यादायशूलिकः for 3705b. 3706. 1. C. तुल्यावामवच्छशिनौ for तुल्यावात्मवद्वशिनौ. 3707. 1. C. परिशिष्टं for परिविष्टं. 3708. 1. C. आच्छन्नं for आच्छिन्नं. 3709. 1. BD. प्रलुलितं for प्रेङ्खितं; 2. C. श्रेष्ठौ समावुभौ for श्रेष्ठावुभौ समौ.

परिनापस्तु दवथुरनुतापो [1]विसूरिता ।
सादोऽवसन्नता खेदः क्रीडनं तु विनोदनम् ।
3715 अर्थना तु धनाया स्यादीहनं चेष्टनं समे ।
वितर्कस्तु विकल्पः स्यादत्यायानमतिक्रमः ।
अथाशयः स्यादाकूतं[1] समे ग्रन्थनगुम्फने[2] ।
काण्डस्तृतीयोऽनु[1]क्रान्तः साङ्गोपाङ्गैः सविस्तरैः ।
नृब्रह्मक्षत्रविट्छूद्रैरध्यायैरिह चाष्टभिः ।
3720 विशेष्यनिघ्नसंकीर्णसहितैः सोक्त[1]शेषकैः ॥

इति * वत्सकुलवामनभट्टबाणविरचिते शब्दरत्नाकरे
उक्तशेषाध्यायः ❀❀पञ्चविंशः ॥
॥ इति तृतीयः काण्डः ❀❀❀ समाप्तः ॥

—— :❀: ——

3713. 1. BD. विसूरिका, C. विधूयज्ञा for विसूरिता. 3717. 1. BD. अकूतं for आकूतं; 2 C. गुम्भने, D. कुम्भने for गुम्फने. 3718. 1. C. नृत्तान्तः for °ऽनुक्रान्तः. 3720. 1. B. स्वोक्त for सोक्त. ❀ BD. om. वत्सकुल. ❀❀ सप्तविंशः for पञ्चविंशः. ❀❀❀. Ms. C. from Mysore ends here with a note in Tamil saying that the ms. is incomplete ("inda nighaṇṭu mukiyavillai inda eṭṭile")

चतुर्थः काण्डः

२६

अनेकार्थाधिकारः

अथा'ध्यायैरनेकार्थाः प्रोच्यन्तेऽत्र यथोदितम् ।
क्वचिदेवैकलिङ्गाश्च नानालिङ्गा अपि क्वचित् ।।
ते तु द्वित्रिचतुःपञ्चवर्णात्मपदसंग्रहात् ।
अकरादिक्रमादा च हकारान्तात् प्रयोगिणः ।
3725 अजः पितामहे विष्णौ हरे छागे रघोः सुते ।
अर्थो धने शब्दवाच्ये शास्त्रे हेतौ प्रयोजने ।
निवृत्तौ याचने मोक्षे विषयव्यवहारयोः ।
वस्तुन्यथाक्ष [1]आधारे व्यवहारे कलिद्रुमे ।
द्यूतभेदे [1]ग्लहे कर्षे शकटेऽप्यक्षमिन्द्रिये ।
3730 अक्षः [1]पक्वौदने घातेऽतिशये क्षौमवेश्मनि ।

3721. 1. BD. before 1. 3721 add:

शेषाद्रिनाम्ना विदुषोपनीत-
स्तूण्डीरखण्डादिह केरलेषु ।
श्रीशब्दरत्नाकरनामधेयो
निघण्टुवर्योऽयमखण्डभूमा ।
ग्रन्थेऽस्मिन् क्षत्रियाध्यायपर्यन्तमतिसुन्दरम् ।
पञ्चाध्यायी ततः पश्चादुत्तरोत्तरमाकुला ।

3728. 1. A. आधार for आधारे. 3729. 1. BD. व्यये for ग्लहे.
3730. 1. B. प्रह्लोदने for पक्वौदने.

अङ्कश्चिह्नान्तिकोरःसु भृङ्गवृश्चिकयोरलिः ।
अर्कस्तु स्फटिके ज्येष्ठे वृक्षभेदे विवस्वति ।
वर्धमानतिथिप्रायपक्षकीलकयोररणिः ।
चन्द्रे धन्वन्तरौ शङ्खेऽप्यब्जोऽब्जं सरसीरुहे ।
3735 अंशुर्मयूखे सूत्रादिसूक्ष्मांशे भासि भास्वति ।
अणुः सूक्ष्मे व्रीहिभेदेऽप्यर्घोऽर्चायां [1]प्रतिक्रये ।
अस्र आस्र उभौ [1]क्लेशे क्लीबे तु रुधिराश्रुणोः ।
अन्तोऽस्त्र्यवसिते प्रान्ते निश्चये चरमे मृतौ ।
अविरर्के गिरौ मेषे स्त्री तु स्याद्धूम्युदक्ययोः ।
3740 अद्रिरर्के [1]द्रुमे शैले व्याले वृत्रासुरेऽप्यहिः ।
अर्चा पूजाप्रतिमयो[1]रर्तिश्चा[2]पाग्रपीडयोः ।
कोदण्डायुधयोरस्त्रमभ्रं व्योम्नि पयोमुचि ।
हयकुत्सितयोरर्वा स्यादर्यः स्वामिवैश्ययोः ।
घृष्टिमूषि'कयोराखुरारो भौमारकूटयोः ।
3745 आत्मा तु जीवपरयोः शरीरे स्वस्थभावयोः ।
धृतावग्नौ मतौ वातेऽप्याधिर्व्यसनबन्धयोः ।
अधिष्ठाने चित्तदुःख आस्था गोष्ठीप्रतिज्ञयोः ।
तत्परत्वेऽवलम्बेऽथ शुभवाक्याहिदंष्ट्रयोः ।
आशीः स्यादभिलाषेऽथ स्यादिनः स्वामिसूर्ययोः ।

3736. 1. AB. प्रतिक्रिये. for प्रतिक्रिये. 3737. 1. BD. delete क्लेशे. 3740. 1. A. ध्रुवे for द्रुमे. 3741. 1. BD. आर्तिः for अर्तिः; 2. A. छायाग्रपिण्डयोः for चापाग्रपीडयोः.

3750 इरा सुराम्बुभूवाक्षु सगोनडीषु[1] तास्विडा[2] ।
इला तु तासु साध्वीसु[1] स्यादिष्टिर्यजनेच्छयोः ।
सुत्रामसूर्ययोरिन्द्र ईतिः क्लेशोपसर्गयोः[1] ।
उस्रो मयूख उस्रा गौरुमा शैलात्मजातसी ।
उषः काल्यमुषा रात्रिरूतिः स्यूत्यभिरक्षयोः ।
3755 ऊर्णा तन्तौ भ्रुवोरन्तरावर्तेऽव्यादिलोमसु[1] ।
ऋतं तथ्ये शिलोञ्छे च ऋतुर्ग्रीष्मादिपुष्पयोः ।
ऋषयः श्रुतिभृग्वादिज्ञानवृद्धदिगम्बराः ।
ऋक्षोऽच्छभल्ले मण्डूकपर्ण्या[1] ऋक्षं तु तारके ।
ओघः परंपरासंख्यप्रवाहेषु कदम्बके ।
3760 कामः काम्यस्मरेच्छासु कलहेऽन्त्ययुगे[1] कलिः ।
कालः शनैश्चरेऽनेहस्यन्तकेऽत्ययवर्णयोः ।
शिक्ये दृग्रुचि मृद्भेदे काचः [1]काशः शरे त्विषि ।
करिगण्डे [1]शवे श्रोण्यां [2]कलिङ्गे च भृशे कटः ।
मेघाश्मनि बलौ हस्ते करिहस्ते घृणौ करः ।
3765 कोणोऽश्रौ लगुडे सौरौ केतुरङ्के ध्वजे ग्रहे ।
मुख्ये दुर्जात उत्पाते कणो लेशे कणौ(णो?)षणा ।

3750. 1. BD. सनोनाडीकृतास्विडा for 3750b; 2. A. नड्विडौ for तास्विडा. 3751. 1. BD. सर्वासु for साध्वीसु. 3752. 1. A. नर्त्तयोः for सर्गयोः. 3755. 1. D. व्याधि for °ऽव्यादि. 3758. 1. B. मण्डूके वर्ण्या, D. मण्डूकवर्ण्या for मण्डूकपर्ण्या. 3760 1. A. °ऽत्ययगे, B. ऽन्ययुगे for °ऽन्त्ययुगे. 3762. 1. B. काचं for काशः. 3763. 1. A. श्रवे for शवे; 2. A. केलिङ्गे for किलिङ्गे.

कुट्मले पुस्तकेऽर्थौघे दिव्येऽण्डेऽसिपिधानके[1] ।
मेहने[1] वेष्टके गेहे शरीरे कोशमस्त्रियाम् ।
अलंकृतायां कन्यायां दातुं कूपः प्रहावपि ।
3770 कविः काव्यकृति[1] प्राज्ञे वाल्मीकौ दैत्यदेशिके ।
कोलोऽस्त्री चव्यपिप्पल्योः[1] पुमान् खञ्जे प्लवे किटौ ।
क्लीबे तक्कोलबद[1]रव्योषशुण्ठीषु[2] कर्षके ।
कर्णः श्रोत्रे रविसुतेऽरित्रभेदे नियामके ।
लून[1]श्रोत्रवृषे कल्यस्त्रिषु दक्षे निरामये[2] ।
3775 पेषणे रजसि क्षोदः क्षारस्तु गुडभस्मनोः ।
काण्डोऽस्त्री दण्डवर्गेषुनालावसरवारिषु ।
कण्ठः शब्दे गले कुम्भो घटद्विपशिरोंऽशयोः[1] ।
कूटोऽस्त्री पुञ्जमायाद्रिशृङ्गायोघ[1]नवेश्मसु ।
फाले बाणान्तरे दम्भे भग्नशृङ्गवृषे तु ना ।
3780 तरक्षौ रक्षसि क्रव्याल्लुब्धके च चितानले ।
वराहे वक्षसि क्रोडः क्रोडमुत्सङ्गकुक्षिणोः ।
कल्पान्तेऽपचये वासे करिपादांशके क्षयः ।
क्लृप्तौ कल्पद्रुमे न्याये कल्पः कीशे[1] गजे कपिः ।

3767. 1. D. पिधानयोः for पिधानके. 3768. 1 D. कमेहने पेष्टगेहे for 3768a. 3770. 1. A. काव्याकृतिः for काव्यकृति. 3771. 1. B. पिल्बल्योः for पिप्पल्योः. 3772. 1. B. बदिर for बदर; 2. B. शुण्ठीष्ट for शुण्ठीषु. 3774. 1. A. लूनः श्रोत्रवृषे for लूनश्रोत्रवृषे; 2. BD. om. l. 3774. 3777. 1. D. °ऽसयोः for °ऽशयोः. 3783. 1. A. केशे for कीशे.

कश्यस्त्रिषु कशाताड्ये कश्यं [१]मद्याश्वमध्ययोः ।
3785 क्रमस्तु पादविक्षेपे वेदपाठान्तरे[१] विधौ ।
उत्सवेऽवसरे मध्ये[१] कालभेदाल्पकालयोः ।
हिंसाव्यापारवैकल्यपरतन्त्रत्व[१]पर्वसु ।
क्षणोऽथ क्रोश आक्रन्दे गव्यूतिद्वय[१]गर्हयोः ।
आह्वाने रोदने क्लेशस्त्वविद्याद्युपतापयोः ।
3790 खगाद्रि[१]भेदयोः क्रौञ्च ऋषिभेदेऽध्वरे क्रतुः ।
क्रूरो नृशंसे कुपिते भीषणे कर्कशे त्रिषु ।
क्षम[१]स्त्रिषु हिते योग्ये युक्ते शक्ते पटावपि ।
स्थालिकायां जलाधारविशेषे वह्निगर्तके ।
कुण्डं जारसुते कुण्डः कुशो दर्भे कुशं जले ।
3795 क्षेत्रं तु दारकेदारपुण्यस्थानात्ममूर्तिषु ।
पुरे योनौ[१] समूहेऽथ मेदिन्यां च क्षये क्षितिः[२] ।
मत्सरे सुरभौ तिक्ते चोषणे[१] च कटुस्त्रिषु[२] ।
कोक ईहामृगे चक्रे कायो देहे[१] कदैवते ।
त्रिष्वन्तःकुक्षि कोष्ठोऽस्त्री कुसूलेऽन्तर्गृहे पदे ।
3800 कूर्चमस्त्री कुशे पीठे भ्रूमध्यश्मश्रुणोरपि ।

3784 1. BD. मध्या° for मद्या°. 3785. 1. A. पारान्तरे for पाठान्तरे. 3786. 1. A. मध्य for मध्ये. 3787. 1. A. पर्यनु for पर्वसु. 3788. 1. BD गर्ह्योः for गर्हयोः 3790. 1. A. खगात्रि, D. खगादि for खगाद्रि. 3792. 1. A. क्षुमः for क्षमः. 3796. 1. A. धेनौ, BD. यानौ for योनौ; 2. AB. क्षतौ for क्षितौ. 3797. 1. A. चूषणे for चोषणे; 2. A. करत्रिषु for कटुस्त्रिषु. 3798. 1. A. देहैकदेवते for देहे कदैवते.

कचः[1] केशे जीवपुत्रे कृष्णो नीलेऽनले हरौ ।
व्यासेऽर्जुने च कृष्णा तु पिप्पली द्रुपदात्मजा ।
कक्ष्या काञ्च्यां वरत्रायां कच्छवेश्मप्रकोष्ठयोः ।
काष्ठोत्कर्षौ हरित् सीमा कान्तिः शोभाभिकामयोः ।
3805 क्ष्वेला स्त्री सिंहनादे ना विषवेणुशलाकयोः ।
विलेखप्राज्ञयोः पुंसि कृष्टिराकर्षणे स्त्रियाम् ।
ज्ञाने शिल्पे वित्तवृद्धौ काले चन्द्रांशके कला ।
महाभूतेष्विन्द्रियेषु कलनेऽवयवांशयोः ।
किष्कुर्द्वयोर्वितस्तौ स्यात् सप्रकोष्ठकरे नरि ।
3810 क्रिया कर्मणि पूजायां करणे संप्रधारणे ।
शिक्षायां निष्कृतौ[1] चेष्टाचिकित्सोपाययुक्तिषु ।
आरम्भे[1] कोटिरश्र्यग्रप्रकर्षावधिसीमसु ।
खगोऽर्के विहगे वायौ तारके सुरमेघयोः ।
गर्दभे रक्षसि खरः खरुः पुंसि स्मरे हरे ।
3815 गुणो[1] मौर्व्यामप्रधाने नाम्नि सत्त्वादिशौर्ययोः ।
शब्दार्थवृत्ति[1]माल्येषु [2]तन्तुरश्मीन्द्रियेषु च ।
पर्वतोपलयोर्ग्रावा[1] गणः प्रमथसंघयोः ।
उपराग उपादाने सत्त्वे सूर्यादिके ग्रहः ।

3801. 1. B. काचः for कचः. 3811. 1. AB. निकृतौ for निष्कृतौ. 3812. 1. B. आरम्भः; D. आरम्भो for आरम्भे. 3815. 1. A. गुणे for गुणः. 3816. 1. BD. शब्दार्थावृत्ति for शब्दार्थवृत्ति; 2. BD. तन्त्री for तन्तु. 3817. 1. A. पर्वतोपलयोर्ग्राह for पर्वतोपलयोर्ग्रावा.

शास्त्रे श्लोके श्रुतौ[1] ग्रन्थो ग्रन्थिः परुषि बन्धने ।
3820 गर्भस्तु कुक्षौ कुक्षिस्थजन्तौ पनसकण्टके ।
अभ्यन्तरेऽपवरके सुते केशान्तरस्रजि ।
गोत्रं नाम्नि कुले पुंसि शैले स्त्री भुवि गोगणे ।
उपदेष्टरि मन्त्रादेः पित्रादौ गीष्पतौ गुरुः ।
मात्रादौ स्त्री बृहत्ख्यातदुर्जरालघुषु त्रिषु ।
3825 द्वात्रिंशदक्षरश्लोके ग्रन्थः शास्त्रे श्रुतावपि ।
भोजने कवले [1]ग्रासो गन्धो यशसि सौरभे ।
व्यूहे [1]स्तम्बे गदे गुल्मो गदः[2] कृष्णानुजे रुजि ।
गण्डः कपोले पाषाणे गुहः स्कन्दे गुहा दरी ।
मुद्गरेऽयोघने मेघे घनः कर्पूरभूरुहे ।
3830 स एव संहते सान्द्रे संघाते कठिने त्रिषु ।
घनं कांस्यादिके वाद्ये [1]लयसाम्ये भृशार्थके ।
घोष आभीरपल्ल्यां [1]स्याज्जालिन्यां च ध्वनौ विषे ।
अदने हरिते घासो घृणिर्ज्वालांशुवीचिषु ।
चन्द्रः शशिनि कर्पूरे तरौ हेम्नि नपुंसके ।
3835 चक्री दर्वीकरे विष्णौ कुलाके छन्नवत्यपि ।
प्रचारे प्रणिधौ चारश्चीनो देशे मृगान्तरे ।
आलेख्याश्चर्ययोश्चित्रं चिह्नमङ्के ध्वजेऽपि च ।

3819. 1. D. श्रुते for श्रुतौ. 3826. 1. A. ग्रासे for ग्रासः. 3827. 1. AD. स्तम्भे for स्तम्बे; 2. BD. गदं for गदः. 3831. 1. A. लयः for लय. 3832. 1. B. स्यान्मालिन्यां, D. स्याच्चालिन्यां for स्याञ्जालिन्यां.

स्तुतिवादे चटुश्चाटुरुभौ पशुपिचण्डके ।
चोलः कूर्पासके देशे चोरौ मशकतस्करौ ।
3840 पुंनपुंसकयोर्वस्त्रे चीरश्चीरी तु [1]झल्लिका ।
चक्रं राष्ट्रजलावर्तसैन्यच्छद्मसु संहतौ ।
रथाङ्गे मण्डले वृत्ते संसारायुधभेदयोः ।
चूर्णि[1]र्ग्रन्थे कपर्दे च चर्चा चार्चिक्यचिन्तयोः ।
पाठे च चञ्चुरेरण्डे पुंसि पक्ष्यङ्गके स्त्रियाम् ।
3845 छदः[1] पत्त्रे पलाशे च च्छन्दोऽभिप्रायवाञ्छयोः ।
कान्त्यनातपयोश्छाया प्रतिबिम्बार्कभार्ययोः ।
छन्दः पद्यश्रुतीच्छासु च्छद्म सद्मनि कैतवे ।
छिद्रं तु रन्ध्रावसराप[1]देशेष्वथ संहतौ ।
गवाक्षानाययोर्जालं क्षारके कपटे गणे ।
3850 जरठे देशभेदे च जीनो[1] बुद्धार्हतोर्जिनः
प्राणि[1]नि त्रिषु जीवः स्यात् पुंसि जन्तौ बृहस्पतौ ।
स्त्री मौर्व्यामथ जन्तुः स्यात् प्राणिनि क्षत्रियान्तरे ।
जम्बीरे दैत्यभेदे च जम्भो भूतान्तरेऽपि च ।
ज्येष्ठा त्वलक्ष्मीर्नक्षत्र[1]ज्यायसी गृहगो[2]लिका ।
3855 जातिर्जन्मनि मालत्यां सामान्ये ब्राह्मणादिके ।

3840. 1. BD. झिल्लिका for झल्लिका. 3843. 1. A. चूर्णी for चूर्णिः.
3845. 1. B. छन्दः for छदः. 3848. 1. B. °सरोप° for °सराप°.
3850. 1. AB. जिनः for जीनः. 3854. 1. A. नक्षत्रं ज्यायसि;
2. AD. गौलिका for गोलिका.

झषो[1] मीने च मकरे झ[2]म्पाश्वादिगतौ गते ।
प्रमाणगर्वयोष्टङ्को मृगे पाषाणदारणे ।
डिम्भः प्लीह्नि खगापत्ये ढक्कावाद्ये सरित्यपि ।
द्युतद्विण तद्विण च त्वष्टा तालस्तु नरके द्रुमे ।
3860 द्वारबन्धनयन्त्रे च वाद्यभेदे विलम्बिते ।
कुञ्चिकायां [1]च तारस्तु मुक्ताशुद्धा[2]वुडौ न ना ।
दृङ्मध्यरज्जुसुग्रीवजायासु स्त्री त्रिषूज्ज्वले ।
तन्त्रं स्यादौषधे [1]शास्त्रराष्ट्रचिन्तानवाम्बरे ।
परि[1]च्छदे तन्तुवाये प्रयोगे क्रतुकर्मणाम् ।
3865 तीर्थं मन्त्राद्युपाध्यायशास्त्रेष्वम्भसि पावने ।
पात्रोपायावतारेषु स्त्रीपुष्पे योनियज्ञयोः ।
तेजः पराक्रमे प्राणे वर्चस्यर्चिषि तेजसि ।
धर्मेऽग्नौ नवनीते च तल्पं शयनजाययोः ।
रत्नदोषे भये त्रासस्तनुः स्त्री त्व[1]क्शरीरयोः
3870 त्रिष्वल्पे च कृशे चाथ तमो राहुस्तमः [1]शुचि ।
ध्वान्ते पापे गुणेऽज्ञाने मोहे तीक्ष्णं तु शस्त्रके ।
त्रिषु क्रूरोष्णशातेषु तिग्म[1]स्तीव्रोष्णयोस्त्रिषु ।

3856. 1. A. om. 1. 3851; 2 D. जम्पा for झम्पा. 3861. 1. A. तु for च; 2. A पुटौ, D. वुढौ for °वुडौ. 3863. 1. BD. शास्त्रे for शास्त्र. 3864. 1. BD. परिच्छेदे for परिच्छदे. 3869. 1. A. न्वाच्छरीरयोः for त्वक्शरीरयोः. 3870. 1. AD. शुचिः for शुचि. 3872 1. A. त्रीप्रोष्ण° BD. त्रीव्रोष्ण° for तीव्रोष्ण°.

दण्डः [1]सैन्ये दमे[2] यष्ट्यां मेढ्रे[3] पार्श्वचरे रवेः ।
वने वनानले दावदवौ दन्तस्तु भूभृताम् ।
3875 कटके स्थूलपाषाणे रदनेभविषाणयोः ।
जायाभावे तु दन्ता स्त्री देशो[1] नीवृत्प्रदानयोः[2] ।
यौतकादिधने दाने दायो द्युम्ने च पैतृके ।
द्रोणं तु कार्मुके द्रोणो वृश्चिके जलवायसे ।
मानभेदे पितर्यश्वत्थाम्नो गुल्मान्तरेऽपि च ।
3880 स्याद्गुणेतरवाताद्योर्दोष एनसि दुर्विधौ ।
अव्यये दरमल्पार्थे दरः शङ्खे भये बिले ।
दुर्गा तु पार्वती दुर्गो राष्ट्रे दुर्गं वने पुरे ।
दुर्गमे त्रिषु दंष्ट्री तु शार्दूले मूषिके किटौ ।
सदंष्ट्रपन्नगे ग्राहे दानं हस्तिमदेऽपि च ।
3885 द्वन्द्वं वसन्तग्रीष्मादिमिथुने कलहे युगे ।
दृष्टिर्दर्शन[1]धीदृक्षु [2]दाम प्रग्रहमाल्ययोः ।
धर्मो न्याययमाचाराहिंसावैदिककर्मसु ।
साम्यस्वभावसुकृतेष्वस्त्री धर्मं तु कार्मुके ।
धातुर्भुवादिशब्दादिगैरिकादित्वगादिषु[1] ।
3890 चक्षुरादिपृथिव्यादिहेमादिषु च रेतसि ।

3873. 1. A. सोमे for सैन्ये; 2. B. यमे for दमे; 3 A. नेध्रे for मेढ्रे. 3876. 1. BD. देशे for देशः; 2. A. प्रधानयोः for प्रदानयोः. 3886. 1. A. दृष्टिर्दंशनदिद्रक्षु; B. दृष्टिर्दंशनदीधिक्षु; D. दृष्टिर्दंशनदीधिष्म for 3886a; 2. A. दाम प्रहरद्रुतुल्ययोः for 3886b. 3889. 1. A om. II. 3889—3892.

मरुर्धन्वा धनुर्धन्व[1] धवः पत्यौ द्रुमान्तरे ।
धृतिः सौख्ये धारणे च धाता ब्रह्मणि पोषके ।
धारा सलिलसंतत्यां[1] सैन्याग्रे वाजिनां गतौ ।
अस्त्राग्रेऽप्यथ धात्री भूरुपमातामलक्यपि ।
3895 नगः[1] शिलोच्चये वृक्षे नाकः स्वर्गान्तरिक्षयोः ।
नागः सर्पे गजे ग्राहे नरोऽर्जुनमनुष्ययोः ।
नग्नो रुद्रो जिनोऽवासा वेदत्यागी निरग्निकः ।
नाशस्त्वदर्शने मृत्यौ परिध्वंसे पलायने ।
हेम्न्युरोभूषणे[1] कर्षे साष्टकर्षशते पले ।
3900 दीनारेऽपि च निष्कोऽस्त्री नेमिः सीमाव्यवस्थयोः ।
देशक्रिमी[1]क्षुतिलकातिमुक्तेषु विशेषके ।
पुण्ड्रः पिण्डस्तु वपुषि गुडे वृत्ते सुसंहते ।
पक्षोऽर्धमासे गरुति पार्श्वद्वारेऽन्तिके बले ।
पार्श्वे चुल्लिबिले[1] भित्तौ सहाये साध्यवश्ययोः ।
3905 पणस्तु[1] कार्षिके द्यूते ग्लहे मूल्ये भृतौ धने ।
स्यान्मानव्यवहारा[1]द्यविक्रय[2]द्रव्यमुष्टिषु[3] ।
प्रायो वयसि बाहुल्ये तुल्यानशनमृत्युषु ।

3891. 1. B. धन्वा for धन्व. 3893. 1. B. संतत्योः for संतत्यां. 3895. 1 A. नागः for नगः. 3899. 1. A. हेम्नूरौ भूषणे कर्षः for 3899a. 3901. 1. A. कृमि, BD. क्रमि for क्रिमि. 3904. 1. B. चिल्लुबिलो, A. चुल्लीबले for चिल्लिबिले. 3905. 1. A. वर्णस्तु for पणस्तु. 3906. 1. BD. व्यवहारे for व्यवहारा°; 2. B. विक्रियादिव्य, D. विक्रयादिप्य for विक्रयद्रव्य; 3. A मिष्टिषु for मुष्टिषु.

पतिः स्वामिनि पत्यौ च पत्री श्येनपृषत्कयोः ।
प्राणस्तु जीविते[1] जीवे जीवात्मपरमात्मनोः ।
3910 अन्तर्याम्यन्तःकरणवायुभेदबलेषु च ।
पोतः प्रवहणे[1] डिम्भे[2] पाकः पचनडिम्भयोः[3] ।
कालस्य चावधौ प्रैषः प्रेषणे[1] मर्दनेऽपि च ।
पद्मोऽस्त्री पङ्कजे ना तु निधौ व्यूहेऽहिपुंगवे ।
स्त्री श्रियामौषधे षण्डः[1] संख्यायां गजबिन्दुषु ।
3915 अष्टकायां परं[1] दूरे भृशे मुख्यान्ययोः पुमान् ।
पादग्रन्थेरधः पार्ष्णि पुमांस्त्र्युत्तमयोषिति ।
पुङ्खः श्येने [1]शराङ्गे च [2]पविर्वज्रसमीरयोः ।
पशुरज्ञगवाद्योः स्यात् परोऽरिपरमात्मनोः ।
पिण्डिर्ना तैलकल्के स्त्री रथनाभौ च पिण्डिका[1] ।
3920 पयः पाथसि च क्षीरे पङ्कोऽस्त्री कर्दमांहसोः ।
पलाशे[1] वाहनं पत्रं छुरिकायां गरुत्यपि ।
पात्रं योग्ये भाजने च वित्ते[1] कूलद्वयान्तरे ।
पाने स्त्री पीतिरश्वे ना पोत्रं लाङ्गलदंष्ट्रिणोः[1] ।
मुखाग्रदेशेऽथ पलं मांसे कर्षचतुष्टये ।

3909. 1. BD. जीवने for जीविते 3911. 1. B. प्रवाहणे for प्रवहणे; 2. D. डिम्बे for डिम्भे; 3. AD. डिम्बयोः for डिम्भयोः. 3912. 1. A. पेषणे for प्रेषणे. 3914. 1. BD. षण्डे for षण्डः. 3915. 1. A. पुरं for परं. 3917. 1. BD. शराङ्गेषु for शराङ्गे च; 2. A. परिः for पविः. 3919. 1. BD. पिण्डिका for विष्टके. 3921. 1. A. पलाले for पलाशे. 3922. 1 A. वृत्ते for वित्ते. 3923 .BD. दंष्ट्रयोः for दंष्ट्रिणोः.

3925 पर्व पञ्चदशीग्रन्थ्योः प्रस्तावे[1] विषुवादिके ।
पार्श्वमस्त्री समीपे च[1] प्रजा तु जनपुत्रयोः ।
पुण्यं धर्मे शुभे शुद्धे पूर्वः प्राच्यादिकेऽर्थवत् ।
पूर्वजेषु नृभूम्नोः[1] स्यात् प्रस्थोऽस्त्री सानुमानयोः ।
फालो[1] निरीषके स्फोटे श्वेतार्के दाडिमे[2] फले ।
3930 भोगनिष्पत्तिलाभेषु बीजे फाले धने फलम् ।
राजदेये बलिर्दैत्यभेदे पूजोपहारयोः ।
कपिले त्रिषु बभ्रुर्ना नकुले केशवे मुनौ ।
प्रतिबिम्बे प्रतिकृतौ बिम्बोऽस्त्री मण्डले समे ।
बाणः शरे बलिसुते वृक्षभेदे तु वा स्त्रियाम् ।
3935 आधि[1]बन्धनयोर्बन्धो बन्धुर्बान्धवकामयोः ।
बलो रामे दैत्यभेदे काके[1] बलवति त्रिषु ।
सहायस्थौल्यसैन्येषु शक्तौ क्लीबे बलौलौषधे ।
जन्मसंसारसात्तासु भद्रे भूतपतौ भवः ।
भगो रुद्रे मुनौ[1] सूर्ये धर्मे प्राज्ञे तपस्यपि ।
3940 वैराग्यैश्वर्यकान्तीच्छायत्नवीर्ययशःस्वपि ।
भोगो[1] वेश्याभृतौ[2] राज्ये सौख्येऽर्थे पालने रतौ ।
विहारे व्यवहारे च फणिनः फणदेहयोः ।

3925 BD. प्रास्तावे for प्रस्तावे. 3926. 1. A. समीपेऽथ for समीपे च. 3928 1. BD नृभूम्योः for नृभूम्नोः. 3929. 1. BD. फाले for फालः; 2. B. डाडिमे for दाडिमे. 3935. 1. AD. आदि for आधि. 3936. 1. BD. काले for काके. 3939. 1. A. मनौ for मुनौ. 3941. 1. A. भागः for भोगः; 2. A. भृते for भृतौ.

भूतं खादौ[1] च जन्तौ च न स्त्रियां गणसत्त्वयोः ।
भागोंऽशे भागधेये च भानुः किरणभास्करौ ।
3945 भावश्चेष्टाक्रियालीलासत्ताभिप्रायजन्तुषु ।
आत्मभावेन्द्रियज्ञानमनोविकृतिभूतिषु ।
द्रव्यमात्ररसोत्पत्तिस्वभावात्मसु चेङ्गिते[1] ।
गजभेदे वृषे भद्रः शुभे क्लीब उरौ त्रिषु ।
भङ्गः [1]पराजये छेदे [2]तरङ्गे चावखण्डने ।
3950 भङ्गा तु यव[1]भेदे स्याद् भीमौ रुद्रवृकोदरौ ।
नरकाङ्गारकौ भौमौ भेकौ[1] वर्षाभ्वि[2] कातरे[3] ।
मन्युः कोपेऽध्वरे[1] शोके मरुद्देवसमीरयोः ।
मन्दः शनौ सरोगेऽज्ञे निर्भाग्येऽल्पे[1]ऽपटौ त्रिषु ।
अजागलस्तने रत्ने[1]ऽलिञ्जरेऽपि मणिर्द्वयोः ।
3955 मौलिस्तु संयते केशे चूडायां मकुटे द्वयोः ।
वाचंयमे वसिष्ठादौ बुद्धे[1] वृक्षे जिने मुनिः ।
मधुस्तु यादवे चैत्रे वसन्ते दानवान्तरे ।
वा पुंसि मद्ये[1] क्लीबे तु स्यात् क्षौद्रमकरन्दयोः ।

3943. 1. A खातौ. D. व्याधौ for खादौ. 3947. 1. D. om. 1. 3947. 3949. 1. A. पराजयः for पराजये; 2. A. तगे चावर्तखण्डने BD. तुरङ्गे चापखण्ने for 3949b. 3950. 1. BD. धवभेदे for यवभेदे. 3951. 1 D. भेके for भेकौ; 2. A. वर्षासिकातरे for वर्षाभ्वि कातरे; 3. BD. कान्तरे for कातरे. 3952. 1. A. ध्वजे for ऽध्वरे. 3953. 1. BD. delete अल्पे. 3954. 1. D. रक्ते for रत्ने. 3956. 1 BD. बुधे for बुद्धे. 3958. 1. ABD. मध्ये for मद्ये.

स्याद्राश्येलकयोर्मेषो मोहो वैचित्र्यमौर्ख्ययोः[1] ।
3960 मरुर्धन्वनि देशे च मारस्तु मरणे स्मरे ।
माता ब्राह्म्याद्यकाराद्योरुमायां गवि मातरि ।
अक्षरावयवे माने प्रवृत्तौ [1]कर्णभूषणे ।
अंशे परिच्छदे मात्रा मात्रं कार्त्स्न्येऽवधारणे ।
मदो दाने स्मये मूलं शिफातारादिहेतुषु ।
3965 मृगस्तु हरिणे सौम्ये नक्षत्रेऽन्वेषणे गजे ।
मार्गो मृगशिरोमासान्वेषणाध्वसु याचने ।
मुख्य[1]द्वाराभ्युपायेषु ताम्रे च वदने मुखम् ।
यमो यमलकीनाशसंयमेषु नियन्त्रणे[1] ।
यतिर्यतिनि पुंसि स्यात् कारसंयमोः स्त्रियाम् ।
3970 ध्यानसंनहनोपाययुक्ति[1]विस्रब्धघातिषु ।
प्राप्तौ च संगतौ योगो यासो दुःस्पर्शयत्नयोः ।
गमने वर्तने यात्रा यानमश्वादिके गतौ ।
रसो रागे विषे वीर्ये[1] शृङ्गारादौ पराक्रमे ।
तक्तादौ[1] पारदे शब्दे रेतस्यास्वादने[2]ऽमृते ।
3975 रतिः क्रीडाकामपत्न्योः रदो[1] दन्तविलेखयोः ।
अंशुप्रग्रहयोः रश्मी रणोऽस्त्री युधि ना स्वने

3959. 1. BD. मुख्ययोः for मौर्ख्ययोः. 3962. 1. A. कण्ठ for कर्ण. 3967. 1. BD. मुख for मुख्य. 3968. 1. A. निमन्त्रणे for नियन्त्रणे. 3970. 1. BD. युक्त for युक्ति. 3973. 1 B. द्रव्ये for वीर्ये. 3974. 1. B. रिक्तादौ for तिक्तादौ. 3975. 1. D. रतौ for रदः.

चन्द्रक्षत्रिययोः राजा लताभेदे नृपे प्रभौ ।
रजः पांस्वार्तवांहःसु रहो [1]याभरहस्ययोः ।
रुचिः कन्तिस्पृहार्चिःषु[1] रीतिः स्थित्यारकूटयोः ।
3980 रेणुर्मुनौ च पांसौ च रिष्टं नाशे शुभाशुभे ।
रागोऽलक्तेऽनुरागे च त्विषि[1] वर्णान्तरेऽरुणे ।
लेपने भोजने लेपो लोकः स्याद्भुवने जने[1] ।
लवो लेशे नृपे च्छेदे लङ्का पूर्भेदचिह्नयोः ।
लक्षं[1] शरव्ये[2] संख्यायां लघुस्त्रिषु मनोरमे ।
3985 असार इष्टे क्षिप्रार्थेऽप्यगुरौ क्षुल्लकेऽपि च ।
लीला क्रीडा[1] विलासश्च लक्ष्म चिह्नवरिष्ठयोः ।
चिह्नमेहनयोर्लिङ्गं वेषे बुद्ध्यादिसंगतौ[1] ।
वंशः पृष्ठास्थ्नि नासोर्ध्वास्थ्नीक्षुभेदे कुले गणे ।
वेणौ वेश्मोर्ध्वकाष्ठे च खड्गांशे वाद्यभेदके ।
3990 व्रजा गोष्ठाध्वनिवहा गोश्वासे[1] वाहने[2] वहः ।
विधुर्निशाकरे विष्णौ वाज्यश्वे सायके[1] खगे ।
वयः क्लीबे खगे प्राये वालः पुच्छे शिरोरुहे ।

3978. 1. B. राग, D याग for याभ. 3979. 1. BD. स्पृहार्चिःसु for स्पृहार्चिःषु. 3931 1 A. विष for त्विषि. 3982. 1. A. जन्ते for जने. 3984. 1. A. लक्ष्यं for लक्षं; 2. A. शरव्यं for शरव्ये. 3986. 1. A. क्रिया for क्रीडा. 3987. 1. BD. संहतौ for संगतौ. 3990. 1. BD. गोश्वांसे for गोश्वासे; 2. A. पनसे, BD. वंहने for वाहने. 3991. 1. B. °ऽन्वायके for सायके.

वीचिः [1]पङ्क्त्यूर्मिधारासु वीथिः पङ्क्तिः पदव्यपि ।
विधाः प्रकारहस्त्यन्नविधानर्द्धिभृतिक्रियाः ।
3995 व्युष्टिः फले समृद्धत्वे वेगः किंपाकरंहसोः ।
क्लीबे वारिजले स्त्री तु वारणग्रहणस्थले ।
वीर्यं पराक्रमे शुक्रे वृत्तिर्वर्तनजीवने ।
विधिर्ब्रह्मणि दैवे च विधाने कर्मकल्पयोः ।
वेणी तु देवताली स्यात् केशबन्धोऽम्बुसंततिः ।
4000 वर्णो विप्रादिशुक्लाद्योर्व्रते[1] गीतिक्रमे कुथे ।
कीर्तौ स्तवेऽक्षरे त्वस्त्री [1]प्रकारालेपभाःसु[2] च ।
वीरोऽग्नौ तनये शूरे शक्रे स्कन्दकुबेरयोः ।
हरे राहौ च वर्चोऽर्चीरूपविड्भाःसु[1] तेजसि ।
वरो ना[1]वृतिजामात्रोर्देवताभ्यः समीप्सिते ।
4005 त्रिषु प्राग्रहरे क्लीबे मनागिष्टेऽथ पन्नगे ।
दुष्टद्विपे श्वापदे च व्यालः पुंसि शठे त्रिषु ।
विश्वं जगति सर्वस्मिन् त्रिषु शुण्ठ्यामसौ न ना ।
मूषिके शुनके श्रेष्ठे वृषभे सुकृते वृषः ।
वार्ता वातिङ्गनोदन्तवाणिज्यादिषु वर्तने ।
4010 निःसारारोग्योः क्लीबे वृत्तिमन्नीरुजोस्त्रिषु[1] ।

3993. 1. BD पत्यू for पङ्क्त्यू°. 3998. 1. A विधानक्रम for विधाने कर्म. 4000. 1. B. तेऽङ्की, D.—ते, A. घृते for व्रते. 4001. 1. A. प्रकारो for प्रकारा; 2. A. भानु for भास्सु. 4003. 1. D. भासु for भास्सु. 4004. 1. A. प्रति for वृति. 4010. 1. A. नीरुघो जयः, BD. नीरुजोऽस्त्रियाम् for नीरुजोस्त्रिषु.

वृत्तं तु चरिते पद्ये त्रिष्वतीते च वर्तुले ।
वत्सस्तु तर्णके वर्षे पुत्रादौ कुटजे मुनौ ।
बाले च वक्षसि त्वस्त्री वृषोदक्षिण सुरनायके ।
वासो गन्धे निवासे च वारः पर्यायसंघयोः ।
4015 वसु क्लीबे धने तोये [1]योक्त्रांशुज्वलनेषु ना ।
वर्षाः प्रावृषि वर्षोऽस्त्री भारताद्यब्दवृष्टिषु ।
वाणी वाग्देवतावाचोर्वीतं [1]दुर्गजवाजिनोः ।
शङ्खो निधौ ललाटास्थ्नि नागे कम्बौ तु न स्त्रियाम् ।
शिवो महेश्वरे शङ्कौ पुमान् क्लीबे तु मङ्गले ।
4020 शुद्धे त्रिषु शिवा क्रोष्टाभया शम्यामलक्युमा ।
वृत्रारौ कुटजे शक्रः शुको व्याससुते खगे ।
शङ्कुः पत्रसिराकीलमेहनेष्वायुधान्तरे ।
शेषोऽप्रधानेऽनन्ताख्ये सर्पराजे मधुद्विषः ।
अवतारान्तरेऽपत्ये त्रिष्वन्यत्रोपयुक्ततः ।
4025 मालाक्षतादिदाने स्त्री शेषा [1]शुक्रोऽनले कवौ[2] ।
दक्षिणाग्नौ ज्येष्ठमासे क्लीबे [1]रुक्मेऽप्सु रेतसि ।
अक्षिरोगेऽथ शृङ्गोऽस्त्री पर्वताग्रप्रभुत्वयोः ।
क्रीडाम्बुयन्त्रे पश्वङ्गे शास्त्रं ग्रन्थनिदेशयोः[1] ।
शम्बस्तु लोहवलये दम्भोलौ मुसलाग्रके ।

4015. 1. B. वक्त्राम्बु, D. वक्त्रांशु for योक्त्रांशु. 4017. 1. B. दुर्गन्ध, D. तुर्गन्ध for दुर्गज. 4025. 1. A. शूकः for शुक्रः; 2. B. कलौ for कवौ. 4026. 1. BD. रुग्मे for रुक्मे. 4028. 1. A. निवेशयोः for निदेशयोः.

4030 शीलं वृत्ते स्वभावे च शान्तिः प्रशममङ्गले ।
शष्पकर्दमयोः शादो[1] वेदश्रवणयोः श्रुतिः ।
श्लोकस्तु पद्ययशसोः शुण्डा मद्येभहस्तयोः ।
शब्दः कीर्तौ ध्वनौ वाक्ये श्रवणेऽक्षरगीतयोः ।
स्यादध्वदेयजामातृदेययोः शुल्कमस्त्रियाम् ।
4035 शारिर्द्वयोः कुथे[1] द्यूते पर्याणे ना खगे स्त्रियाम् ।
शंसनेऽस्त्रायसोः शस्त्रं[1] श्यामा युवतिकन्ययोः ।
शुचिर्मासि जातवेदस्युपधाशुद्धमन्त्रिणि[1] ।
त्रिषु शुद्धे सिते[1] शाला मन्दिरस्कन्धशाखयोः ।
स्यात् त्रिष्वाकर्णिते क्लीबे शास्त्रावधृतयोः[1] श्रुतम्[2] ।
4040 सर्गस्तु [1]निश्चयेऽध्याये स्वभावोत्साहसृष्टिषु ।
स्त्री सिन्धुरापगायां ना देशभेदसमुद्रयोः ।
संधिः [1]सुरुङ्गा[2]नाट्याङ्गरन्ध्रसंश्लेषयोनिषु ।
सालोऽश्वकर्णे प्राकारे तरुमात्रे झषान्तरे ।
सत्तायां प्रकृतौ प्राणे पिशाचादौ पराक्रमे ।
045 द्रव्ये बलेऽन्तःकरणे व्यवसायात्मभावयोः ।
स्वभावे निर्मलज्ञाने सत्त्वमस्त्री तु जन्तुषु ।
सत्यं तु शपथे तथ्ये परमार्थेऽभिधेयवत् ।

4031. 1. D. शाकः for शादः. 4035. 1. A. कुधे for कुथे. 4036. 1. BD शास्त्रं for शस्त्रं. 4037. 1. BD. मन्त्रिषु for मन्त्रिणि. 40.8. 1. AD. शिते for सिते. 4039. 1. A. °वध्यतयोः for °वधृतयोः; 2. BD. शतम् for श्रुतम् . 4040. 1. A, निश्चया° for निश्चये. 4042. 1. A. सुरुङ्ग for सुरुङ्गा; 2. B. नाद्राङ्ग, D. नाद्र्राङ्ग for नाट्याङ्ग.

स्वरोऽकाराद्युदात्तादिषड्जादिषु जनस्वने ।
स्वामी षडानने पत्यौ स्वरुर्यूपांशवज्रयोः ।
4050 स्याज्जाड्यस्थूणयोः स्तम्भः सुतः सोमरसेऽपि च ।
मृतिव्यवस्थयोः संस्था सभा तु द्यूतसंसदोः ।
संवित् संकेतसमयप्रतिज्ञाचारनामसु ।
संज्ञा[1]संभाषणज्ञानक्रियाकारेषु तोषणे ।
बले स्थिरांशे सारो ना धने न स्त्री वरेऽर्थवत् ।
4055 प्रतिज्ञानेऽवधौ संधा ज्ञानमर्यादयोः स्थितिः ।
संज्ञा नाम्न्यर्कभार्यायां ज्ञाने हस्तादिसूचने ।
सत्रं यज्ञे सदा दाने [1]वनेऽन्नार्पणवेश्मनि ।
हंसोऽर्के विहगे विष्णौ जीवे श्वेतवृषे स्मरे ।
निःसपत्ननृपे भित्तौ हीरः पन्नगसिंहयोः ।
4060 विष्णुसिंहार्कचन्द्रेन्द्रयमानिलशुकादिषु ।
कपि[1]भेकांशुवाहेषु हरिर्ना पिङ्गले त्रिषु ।
हव आह्वानमखयोर्हेतुः कारणजन्मनोः ।
हरिदर्कहये वर्णे पुंसि स्यात् ककुभि स्त्रियाम् ।
हेतिः स्त्रीपुंसयोर्ज्वाले[1] किरणायुधयोरपि ।

इति वत्सकुलवामनभट्टबाणविरचिते शब्दरत्नाकरे-
ऽनेकार्थाधिकारे द्व्यक्षराध्यायः ॥

* * *

4053. 1. A. संज्ञायां भाषण for संज्ञासंभाषण. 4057. 1. BD. वने ना पणवेश्मनि for 4057b. 4061. 1. B. भेकाशु for भेकांशु. 4064. 1. B. ज्वाला for ज्वाले.

२७

त्र्यक्षराध्यायः

4065 अर्जुनः फल्गुने वृक्षे मातुरेकसुते सिते ।
सहस्रबाहौ दृग्रोगे क्लीबे तृणसुवर्णयोः ।
अर्जुनी गवि नद्यां स्यादनूरौ भास्करेऽरुणः ।
अनन्ता भूरनन्तं खमनन्तो हरिशेषयोः ।
केयूरे त्वङ्गदं क्लीबे पुंसि बालिन[1] आत्मजे ।
4070 अञ्जनं कज्जले ना तु दिग्गजे कपिपुङ्गवे ।
स्त्री कलत्रे केसरिणो मालिन्ये वाच्यलिङ्गकम् ।
अत्ययोऽतिक्रमे दण्डे मरणे कृच्छ्रदोषयोः ।
अरिष्टं सूतिकागारे[1] मद्ये[2] ताम्रे[3] शुभाशुभे ।
कालशेये मृत्युचिह्ने काकनिम्बासुरेषु ना ।
4075 अमृतामलकी पथ्या गुलूची[1] गोस्तनी सुरा ।
अमृतं हेम्नि देवान्ने यज्ञशेषे रसायने ।
अयाचिते जले मोक्षे त्रिषु स्यात् स्वादुनित्ययोः ।
अप्पती[1] वरुणाम्भोधी अगस्त्यौ[2] मुनिपादपौ ।
अन्तरं परिधानीयबाह्यस्वीयेषु वाच्यवत् ।
4080 क्लीबेऽवसरतादर्थ्यमध्यान्तर्धान्तरात्मसु ।

4069. 1. A. वालिनः for बालिनः. 4073. 1. BD. सूतिकागेहे for सुतिकागारे; 2. A. मध्ये for मद्ये; 3. BD. कामे for ताम्रे. 4075. 1. A. गलूची for गुलूची. 4078. 1. B. अप्पतिर्वरुणा° for आप्पती वरुणा°; 2. A. अगस्त्यो for अगस्त्यौ.

अवकाशेऽवधौ भेदे विनार्थच्छिद्रयोरपि ।
अपानः पुंसि देहस्थवायौ पायौ नपुंसके ।
ब्रह्मण्यव्यक्तमस्पष्टे त्रिषु स्यात् [1]सौम्यमन्दयोः ।
अलसोऽथाङ्गजः कामे प्राणादौ तनये रुजि ।
4085 अभिख्या त्विड्यशोनामस्वयनं नरके पथि ।
सूर्योदग्दक्षिणे[1] यानेऽप्यलीकं [2]त्वप्रियानृते ।
अण्डजो ब्रह्मणि व्याले गोधायां सरटे[1] खगे ।
अशनिर्वज्रत[1]टितोरनीकोऽस्त्री चमूयुधोः ।
अक्षरः पुरुषे[1] ब्रह्मवर्णनिःश्रेयसेऽक्षरम् ।
4090 आलोकौ [1]दर्शनद्योतावाहवौ समराध्वरौ ।
आम्नायः संप्रदायेऽपि वेदाध्ययनयोरपि ।
आकार इङ्गिताकृत्योरागमः श्रुतिशास्त्रयोः ।
आसारोऽतिमहावृष्टौ प्रसारे[1] च सुहृद्बले ।
तपोवने मठे ब्रह्मचर्यादावाश्रमोऽस्त्रियाम् ।
4095 आशयो हृदये ज्ञानेऽभिप्राये कौतुकेऽपि च ।
प्रभावागामिसमयदैर्घ्येष्वायतिरागमे ।
आसनं वारणस्कन्धे आस्पदं स्थानकृत्ययोः ।
स्तम्भमात्रेऽपि चालानमाशंसा स्तववाञ्छयोः ।

4083. 1. A. सभ्य for सौम्य. 4086. 1. A. सूर्योदग्धक्षीणधाने for 4086a; 2. A. च for त्व° 4087. 1. A. सुमटे for सरटे. 4088. 1. B. तडितो° for तटितो°. 4089. 1. BD. परुषे for पुरुषे. 4090. 1. A. दर्शनोद्योता° for दर्शनद्योता°. 4093. 1. B. प्रहारे for प्रसारे.

आतङ्को भीतिरुक्तापेष्वामोदो मुत्सुगन्धयोः ।
4100 श्रोण्यां चारोह आवापो न्यास[1] आवाल[2]भूषयोः ।
तदात्वे पात आपात आशुगोऽर्केषुवायुषु ।
आयोगो व्यापृतौ गन्धमाल्योपहरणेऽपि च ।
भक्षणेऽन्धसि चाहार आघातः [1]सीमघातयोः ।
आक्रन्दः क्रन्दने घोरसमरे निन्दनेऽपि च ।
4105 आलवालेऽधिकरणे स्यादाधारोऽम्बुबन्धने ।
आकर्षः शारिफलकद्यूताकृष्टिषु पाशके[1] ।
आनर्तो देशभेदे स्यान्नृत्तवेश्मनि संयुगे ।
आशीरः पावके सूर्ये स्यात् क्षीरविकृतावपि ।
इषीकास्त्रे तृणेऽपि स्यादिल्वलः पुंसि दानवे ।
4110 तारकास्विल्वला स्त्रीत्व ईश्वरोऽधिपतौ[1] हरे[2] ।
उदान[1] उदरावर्ते फणिवायुप्रभेदयोः ।
उपाधिर्धर्मचिन्तायां कुटुम्बव्यापृतावपि ।
उदर्क उत्तरे काले स्यादुत्तरफलेऽपि च ।
उपला स्त्री दृषत्पुत्रे मणिपाषाणयोः पुमान् ।
4115 ऊर्णायुरूर्णनाभौ स्यान्मेषे तल्लोमकम्बले ।
ऋषभो गोवृषे श्रोत्ररन्ध्रे श्रेष्ठे स्वरे मुनौ[1] ।

4100. 1. A. स्याद् for न्यास; 2. BD आवास for आवाल. 4103. 1. A. सम for सीम. 4106. 1. BD. वाशरे for पाशके. 4110. 1. BD. भूपतौ for °ऽधिपतौ; 2. A. हरौ for हरे. 4111. 1. BD. स्यादुदान उदावर्त for 4111a. 4116. 1. A. मनौ for मुनौ.

कलङ्कोऽङ्केऽपवादे च कलिङ्गः खगदेशयोः ।
करेणुर्ना गजे स्त्री तु करिण्यामथ कञ्चुकः ।
वारवाणोऽहिनिर्मोके कर्णिका कर्णभूषणे ।
करिहस्ताङ्गुलौ पद्मबीजे[1] कमलमम्बुजे ।
सलिले करवालादेर्हेमाद्यैश्चित्रिताजिने ।
कमला श्रीः कपर्दस्तु जटाजूटे वराटके ।
क्षुद्रशत्रौ द्रुमाङ्के च रोमहर्षे च कण्टकः ।
भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम् ।
गुग्गुलूलूकशक्रर्षिव्यालग्राहिषु[1] कौशिकः ।
कृतान्तो दैवसिद्धान्तयमाकुशलकर्मसु ।
कलापो भूषणे काञ्च्यां समूहे बर्हतूणयोः ।
कमण्डलौ च दाडिम्यां[1] करको भूम्नि तु स्त्रियाम् ।
वर्षोपलेषु करकाः कलत्रं श्रोणिभार्ययोः ।
श्वभ्रे क्लीबस्तुषाग्नौ ना कुकूलमथ कौतुकम् ।
कुतूहले हस्तसूत्रे कल्याणं हेम्नि मङ्गले ।
कुण्डलं कर्णभूषायां चक्रे पन्नगवेष्टने ।
अस्त्री वृषाङ्गे प्राधान्ये ककुदो राजलक्षणे ।
पुंसीक्षुभेदे कान्तारः क्लीबे वनदुरध्वनोः ।
कदर्ये त्रिषु कीनाशः कृष्यध्यक्षे यमे नरि ।
काके च करिगण्डे च करटः कुहरं रते ।

4120. 1. A. धर्मबीजे for पद्मबीजे. 4125. 1. A. ग्राहेषु for ग्राहिषु.
4128. 1. B. डाडिम्यां for दाडिम्य .

विवरे[1] शैलदर्यां च कूपीटमुदरेऽम्भसि ।
दिग्गजे कुमुदः शाखामृगपन्नगमुख्ययोः ।
कैरवे कुमुदं क्लीबे कदली मृगरम्भयोः ।
4140 कूर्चिका क्षीरविकृतौ सूचीतूलिकयोरपि ।
कबन्धोऽस्त्र्यपमूर्ध्न्यङ्गे षण्डेऽम्भस्याशरे पुमान् ।
कादम्बः सायके हंसे कदम्बः शरभूरुहोः ।
कृतौ विवरणे श्लोके यातनायां च कारिका ।
कालिका घनजालेऽपि कमठो मुनिकूर्मयोः ।
4145 कैतवं कपटे द्यूते कारणं हेतुजन्मनोः ।
बधादौ कारणे[1] काये[2] साधने रतिबन्धने ।
नाट्यभेदेन्द्रियध्यानस्पृष्टाद्युच्चारणेषु च ।
गीतके कर्मणि ज्ञाने करणं द्वादशस्वपि ।
काञ्चनं हेम्नि वृक्षे तु काञ्चनः काञ्चनी निशा ।
4150 क्वाथे कुथे कषायोऽस्त्री निर्यासे सौरभे रसे ।
अस्त्री कशिपु वस्त्रेऽन्ने शय्यायां तद्द्वयेऽपि[1] च ।
कुमारः षण्मुखे बाले युवराजे सितद्रुमे ।
कुमारी चण्डिका कन्या सहा सुदुहितर्यपि ।
कुतपो भागिनेयार्कगोतिथिब्राह्मणेषु ना ।
4155 अस्त्री त्वह्नोऽष्टमे भागे कर्बुरः पुंसि राक्षसे ।

4136. 1. A. पीवरे for विवरे. 4146. 1. A. करणे for कारणे; 2 A. कामसाधने for काये साधने. 4151. 1. BD. तद्विधेऽपि for तद्द्वयेऽपि.

वर्णे च कर्बुरं हेम्नि करीरस्तु[1] घटे पुमान् ।
वंशाङ्कुरे हस्तिदन्तमूलभागेऽपि न स्त्रियाम् ।
यज्ञायुधे कर्परे च कपालं पुंनपुंसकम् ।
निश्चिते[1] केवलं क्लीबे वाच्यवत्त्वेककृत्स्नयोः ।
4160 कुशलं मङ्गले पुण्ये निपुणक्षमयोस्त्रिषु ।
कुहनो मूषिके दम्भे कुद्दालो युगपत्रके ।
खनित्रभेदे सिंहादिस्कन्धरोम्णि तु केसरः ।
बकुलेऽस्त्री तु किञ्जल्के कपिलो मुनिवर्णयोः ।
कटीरं[1] कन्दरे कट्यां कुशिको मुनिवृत्तयोः ।
4165 कुम्भीरस्तस्करे नक्रे क्षवथुः क्षवकासयोः[1] ।
कलहो द्वन्द्वरणयोः कर्परोऽग्निकपालयोः ।
क्षारको मत्स्यपक्ष्यादिपिटके पुष्पजालके ।
कुररः शैलखगयोः कुन्नानं कुण्डशिक्ययोः ।
खिङ्गिरो वरुणे क्रोष्टौ खेचरोऽर्कादिवातयोः ।
4170 पूगे तदीयनिर्यासे खपुरः पूगवेष्टके ।
खनको मूषिके[1] कोले ग्रामणीर्नापितेऽपि च ।
गृहिणी[1] देहली जाया काञ्चिकं गृहकारिका ।
गणिका[1] करिणी[2] वेश्या यूथिका कूटकारिका[3] ।

